15-02-2023.pdf

Title : Prahlada Charita Nrisimha Stava Teeka
(Shridhara Swamy Teeka of Bhagavata Purana)




यप्रद, सर्वेषां लोकानां शर्म मङ्गलमेतदद्भुतं रूपमद्यैव दृष्टं, नतु पूर्वम्। विधिकरः किङ्करः॥ ५६॥ ॥ इति श्रीमद्भागवते म० पु० सप्तमस्कन्धे भावार्थदीपिकायां

॥ किंपुरुषा ऊचुः॥ वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः॥ अयं कुपुरुषो नष्टो धिकृतः साधुभिर्यदा ॥५३॥ ॥ वैतालिका ऊचुः॥ सभासु सत्रेषु तवामलं यशो गीत्वा सैपर्यां महतीं लभामहे॥ यस्तां व्यनैषीद्भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथाऽऽमयः ॥ ५४ ॥ ॥ किन्नरा ऊचुः॥ वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनाऽनुकारिताः ॥ भवता हरे स वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव॥ ५५॥ ॥ विष्णुपार्षदा ऊचुः ॥ अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म ॥ सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः ॥ ५६ ॥ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे प्रह्लादानुचरिते दैत्यराजवधे नृसिंहस्तवो नामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः ॥ नोपैतुमशकन्मन्युसंरम्भं सुदुरासदम्॥ १ ॥ साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम्॥ अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शङ्किता ॥ २ ॥ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमन्तिके ॥ तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ॥ ३ ॥ तथेति शनकै राजन्महाभागवतोऽर्भकः ॥ उपेत्य भुवि कायेन ननाम विधृताञ्जलिः॥ ४॥ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः ॥ उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं कालाहिवित्रस्तधियां कृताभयम् ॥ ५ ॥ ॥

टीकायां अष्टमोऽध्यायः ॥ ८ ॥ ॥ नवमे ब्रह्मणा भीत्या चोदितोऽसुरबालकः ॥ कोपं प्रशमयन्नस्तौन्नृसिंहमतिभीषणम् ॥ १ ॥ 'उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृकेसरी ॥ केसरीव स्वपोतानामन्येषामुग्रविग्रहः ॥' इत्याद्यागमोक्तां भक्तानुकम्पितामाह—एवमिति सप्तभिः। एवं दूरत एव स्थित्वा स्तुवन्तः मन्युना संरम्भ आवेशो यस्य तम्। उप समीपे गन्तुं नाशक्नुवन् ॥ १ श्रीर्लक्ष्मीर्देवैः प्रेषितापि महदद्भुतं तद्रूपं दृष्ट्वा शङ्किता सती तं नोपजगाम। अद्भुतत्वे हेतुः—अदृष्टेति ॥ २ ॥ उपेह्युपगच्छ ॥ ३ ॥ ४ ॥ काल एवाहिस्तस्माद्वित्रस्ता धीर्येषां तेषां कृतमभयं येन तत्कराम्बुजम् ॥ ५ ॥ ॥ ॥

Ref : https://archive.org/details/bhagavatamshridhari/Bhagwat%20Puran%20Shridhari%2004/page/n37/mode/2up?view=theater



[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
ति ॥ ४० ॥ [illegible]
[illegible]
[illegible] ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥

[illegible]

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]